रसनिष्पत्तेः प्रकारचतुष्टयम्

अमित-कुमार-गराइः *

Abstract

[भरतमुनिप्रणीतं नाट्यशास्त्रम् अलङ्कारशास्त्रस्य मूर्धन्यभूतः ग्रन्थः वेदसम्मितः । नाटकं हि सर्वव्यापकम् । उक्तं च भरतेन प्रथमाध्याये—

न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला ।
नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते ॥

तस्मिन् च नाट्ये रसस्य प्राधान्यं बहुधा कीर्तितं मुनिना । तथाहि—"न हि रसादृते कश्चिदर्थः प्रवर्तते" इति । तदनन्तरं साक्षात् रससूत्रं प्राह—"विभावानुभाव-व्यभिचारिसंयोगाद् रसनिष्पत्तिः" इति । अस्मिन् च रससूत्रे संयोगनिष्पत्तिपदयोः अर्थम् आदायैव विवदन्ते विद्वांसः । ततः वादचतुष्टयस्य उत्पत्तिः । ते च वादाः उत्पत्ति-अनुमिति-भुक्ति-अभिव्यक्त्यभिधायकाः । विषयोऽयं तत्र तत्र काव्यशास्त्रेषु शास्त्रीयशैल्या आचार्यैः व्याख्यातः । तदवगमनं न सर्वेषां सुकरमिति धिया शास्त्रमाश्रित्य यथामति व्याख्याताः । अन्ते च कतमः वादः सर्वानुभवसिद्धः प्रमाणितश्चेति विचारितः । एतेन नूनं सर्वेषामयं विषयः बुद्धिगोचरः स्यादिति मे मतिः ।]

कुञ्चिकाशब्दाः— रसः, वादः, उत्पत्तिः, भुक्तिः, अनुमितिः, अभिव्यक्तिः ।

शोधसमस्या

(क) पदद्वयस्यास्पष्टता तथा अर्थवैविध्यम्

भरतमुनेः सूत्रे 'संयोग' तथा 'निष्पत्ति' इति पदयोः कः वस्तुतः तात्पर्यार्थः ? लोल्लटस्य उत्पत्तिवादे, शङ्कुकस्य अनुमितिवादे, भट्टनायकस्य भुक्तिवादे, अभिनवगुप्तस्य च अभिव्यक्तिवादे एतयोः पदयोः अर्थः सर्वथा भिन्नः अस्ति । अतः सूत्रस्य मूलार्थः कः इति मुख्यः प्रश्नः ।

(ख) दार्शनिकसिद्धान्तानां प्रभावः

एते चत्वारः आचार्याः पृथक्-पृथक् दार्शनिकपरम्पराभ्यः (मीमांसा, न्यायः, साङ्ख्यम्, प्रत्यभिज्ञासम्प्रदायः) आगताः । किं दर्शनभेदस्य कारणादेव रसप्रक्रियायाः व्याख्यायां मतभेदः उत्पन्नः ?

* शोधच्छात्रः, संस्कृतदर्शनविभागे, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थाने, वेलुडमठे, पश्चिमवङ्गेषु ; Email : amit.garai.vedvid@gmail.com

(ग) रसस्य स्थितिः

रसः वस्तुतः कुत्र तिष्ठति? मुख्यरामादि-अनुकार्ये, अभिनेतरि (अनुकर्तरि), उत सहृदये (सामाजिके)?

उपक्रमः

आस्वादापरपर्यायः रसः। रस आस्वादनस्नेहनयोः इत्यस्माद्धातोः भावे घञ्प्रत्यये रसपदनिष्पत्तिः। रस्यते आस्वाद्यते इति व्युत्पत्त्या रसाभासभावभावाभासादयोऽपि आस्वादविषयत्वं प्राप्नुवन्ति। रसस्तु तत्र तत्र शास्त्रादिषु रससूत्रमाश्रित्यैव व्याख्याताः विद्वद्भिः[१]। दर्पणकारास्तु—

विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा।
रसतामेति रत्यादिः स्थायिभावः सचेतसाम्॥

[साहित्यदर्पणः ३.१]

विभाव्यन्ते सामाजिकरत्यादिभावाः एभिरिति विभावाः इति व्युत्पत्त्या काव्यनाट्यस्थाः रामसीताप्रभृतयः मेघपर्वतसमुद्रप्रभृतयो वा विभावाः उच्यन्ते, अलौकिकविभावनव्यापारवत्त्वात्। द्विविधो हि विभावः आलम्बनोद्दीपनभेदेन। अनुभावाः[२] चेष्टाविशेषः। सम्यक् रत्यादीन् चारयन्तीति संचारिभावः। व्यभिचरणशीलत्वात् व्यभिचारिभावः[३] इत्यपि उच्यते। स्थायिभावश्च[४] अनादिवासनारूपेण सहृदयमनसि स्थितः रत्यादिभावः। एवं विभावेन अनुभावेन सञ्चारिणा वक्तः सचेतसां हृदये स्थितः रत्यादिस्थायिभावः रसस्वरूपत्वं प्राप्नोति। रससूत्रं यतो हि सर्वसिद्धान्तमूलं,

---

[१] समुचितललितसन्निवेशचारुणा काव्येन समर्पितैः, सहृदयं प्रविष्टैः, तदीयसहृदयता-सहकृतेन, भावनाविशेषमहिम्ना, विगलितदुष्यन्तरमणीत्वादिभिः लौकिकविभानुभाव-व्यभिचारिशब्दव्यपदेश्यैः, शकुन्तलादिभिरालम्बनकारणैः, चन्द्रिकादिभिः उद्दीपनकारणैः अश्रुपातादिभिः कार्यैः, चिन्तादिभिः सहकारिभिश्च, सम्भूय प्रादुर्भावितेन व्यापारेण, तत्काल-निवर्तितानन्दांशावतारणाज्ञानेनात एव प्रमुष्टपरिमितप्रमातृत्वादिनिजधर्मेण प्रमात्रा, स्वप्रकाशतया वास्तवेन, निजस्वरूपानन्देन सह गोचरीक्रियमाणः प्राग्विनिविष्टवासनारूपो रत्यादिरेव रसः। —[रसगङ्गाधरः, पृ. ८७]

[२] उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन्।
लोके यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः॥ —[साहित्यदर्पणः ३.१६२]

[३] यानि व्यभिचरन्ति,तानि व्यभिचारिशब्देन। —[रसगङ्गाधरः, पृ. १४८]

[४] अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः।
आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति संमतः॥ —[साहित्यदर्पणः ३.१७४]

तस्मात् तत्र संशयः मा भूदिति धिया रससूत्रं व्याख्यातं बुधैः । तेषु कः वादः ग्राह्य इति विचारः सयुक्ति प्रस्तुतः ।

भट्टलोल्लटमतम्

रससूत्रस्य व्याख्यातृषु भट्टलोल्लटः रसस्य उत्पत्तिपक्षानुसारी । अतो वादोऽयमुत्पत्त्यभिधायकः । विभावानुभावव्यभिचारिसंयोगात् रामादि-अनुकार्येषु प्रकृतरामे रस उत्पद्यते । तद्रूपानुकारणात् नटादिष्वपि तत्प्रतीयते । त्रिविधेषु भावेषु सीतादि-आलम्बनविभावः रसस्य उत्पादकः । उत्पन्नस्य रसस्य बोधनमनुभावः कारयति । पोषणं च व्यभिचारिभावेन । अतः रत्यादिस्थायिभावेन सह विभावस्य उत्पाद्य-उत्पादकभावः सम्बन्धः, अनुभावस्य च गम्य-गमकभावः सम्बन्धः, व्यभिचारिभावेन च सह पोष्य-पोषकभावः सम्बन्धः । एतदर्थं रससूत्रस्थितसंयोगपदस्यापि अर्थत्रैविध्यं प्रत्यपादि भट्टलोल्लटेन । विभावेन संयोग इत्युक्ते उत्पाद्य-उत्पादकभावः सम्बन्धः, अनुभावेन संयोग इत्युक्ते गम्य-गमकभावः सम्बन्धः, व्यभिचारिभावेन संयोग इत्युक्ते पोष्य-पोषकभावः सम्बन्धः । तदेव प्रकाशयति प्रकाशकारः काव्यप्रकाशे—

"विभावैः ललनोद्यानादिभिरालम्बनोद्दीपनकारणैः रत्यादिको भावो जनितः । अनुभावैः कटाक्षभुजाक्षेपप्रभृतिभिः प्रतीतियोग्यः कृतः, व्यभिचारिभिर्निर्वेदादिभिः सहकारिभिरुपचितो मुख्यया वृत्त्या रामादावनुकार्ये तद्रूपतानुसंधानान्नर्तकेऽपि प्रतीयमानो रस इति भट्टलोल्लटप्रभृतयः" ।

कैश्चत् ललनादि-आलम्बनविभावैः जन्य-जनकभावसम्बन्धात् रत्यादिभावः उत्पद्यते, उद्यानादि-उद्दीपनविभावैः उद्दीप्य-उद्दीपकभाव-सम्बन्धेन रत्यादिभावः उद्दीप्तः सन् कटाक्षभुजाक्षेपाद्यनुभावैः गम्यगमकभाव-सम्बन्धेन प्रतीतियोग्यो भवति । किञ्च निर्वेदादि-व्यभिचारिभावैः पोष्यपोषकभावसम्बन्धेन परिपुष्टः उपचितो रत्यादिस्थायिभावः रसरूपत्वं प्राप्नोति ।

भट्टलोल्लटस्यायं सिद्धान्तः उत्तरमीमांसामधिकृत्य प्रावर्तत न तु पूर्वमीमांसामिति केचित् । तथाहि अद्वैतसिद्धान्ते जगतः प्रतीतिः आध्यासिकी । रज्जौ सर्पज्ञानं यथा तथा । रज्जौ सर्पस्य अस्तित्वं वस्तुतः नास्ति । रज्जुः सर्परूपेण विवर्तते । जगदपि नित्यशुद्धबुद्धमुक्तस्वभावस्य

ब्रह्मणः विवर्तरूपम् । तद्वत् अनुकार्ये रामादौ विद्यमानः रसः रङ्गमञ्चे स्थिते नटादौ अविद्यमानोऽपि अभ्यासकौशलचातुर्यात् अभिनयकाले तेषु प्रतीयते । तेन च सामाजिकमानसे चमत्कारानुभूतिरूपं कार्यमुत्पद्यते ।

भट्टलोल्लटमतखण्डनम्

भट्टलोल्लटमते रसस्य उत्पत्तिः द्विधा जायते । मुख्यतया गौणतया च । मुख्यतया अनुकार्ये रामादौ गौणतया अनुकर्तृषु नटादिषु जायते । तावता सामाजिकानां रसानुभूतिः कथं जायेत इति न प्रतिपादितम् । अनुकर्तृषु रसस्य किञ्च अनुकार्यस्य पुरुषोत्तमस्य रामस्य त्रेतायुगावच्छिन्ने विद्यमानत्वात् नाटकस्य च एतद्युगावच्छिन्ने अनुष्ठीयमानत्वात् एतत्कालीनस्य अभिनयस्य तत्कालीने अनुकार्ये रसानुभूतिः असङ्गता । अतः तदनुकरणकर्त्रादिषु अनुकर्तृषु रसोत्पत्तिः कथं स्यात् ।

श्रीशङ्कुकमतम्

श्रीशङ्कुकस्य मतं न्यायशास्त्राश्रितम् । तन्मते "विभावानुभाव-व्यभिचारिसंयोगात् रसनिष्पत्तिः" इति भरतोक्तरससूत्रस्थस्य संयोगपदस्य गम्यगमकभावसम्बन्धः निष्पत्तिपदस्य च अनुमितिः इत्यर्थः । पर्वतो वह्निमान् धूमात् इत्यनुमानवाक्यात् यथा पर्वते धूमं दृष्ट्वा वह्निः अनुमीयते तद्वत् रङ्गमञ्चे नटादीनां अभिनयं दृष्ट्वा सामाजिकाः तेषु रसमनुमिन्वन्ति ।

भट्टलोल्लटमतखण्डनपुरःसरं शङ्कुकेन अनुमितिवादस्य स्थापना कृता । अनुमानप्रमाणमाधारीकृत्य स्वमतं व्याख्यातम् । रसस्य निष्पत्तिः गम्य-गमकभावेन जायते । विभावः रसकारणम्, अनुभावः कार्यं, व्यभिचारिभावः सहकारिकारणम् । विभावादिसंयोगादेव रत्यादिस्थायिभावाः अनुमीयन्ते । रसस्य आस्वादनं च अनुकार्येषु मूलपात्रेषु भवति । ततः सामाजिकाः अनुकर्तृषु नटेषु रसं अनुमिन्वन्त आनन्दं प्राप्नुवन्ति ।

चतुष्प्रकारकं ज्ञानं हि लोके प्रसिद्धम् । तद्धि सम्यग्ज्ञानम्, मिथ्याज्ञानम्, संशयज्ञानम्, सादृश्यज्ञानमिति । राम एवायम्, अयमेव राम इति सम्यग्ज्ञानम्, न रामोऽयमिति मिथ्याज्ञानम्, रामः स्याद्वा न वा इति संशयज्ञानम्, रामसदृशोऽयमिति सादृश्यज्ञानम् । एतच्चतुष्टयज्ञानेभ्यः विलक्षणं चित्रतुरगन्यायेन नटे रामोऽयमिति प्रतिप्रत्तिर्भवति ।

रामादेः अनुकरणात् नटादौ कटाक्षाद्यनुभावाः अयथार्थोऽपि

शिक्षाभ्यासबलात् कृत्रिमकटाक्षाद्यनुभावानां प्रकाशनात् अनुमानेन रसस्य अनुभूतिः सिध्यति । कृत्रिमरामादिगतरत्यादिस्थायिभावान् समाजिकाः अनुमिन्वन्ति । यद्यपि विभावाद्युपकारणानि कृत्रिमाणि परन्तु सहृदयाः तान् विभावादीन् अकृत्रिमं मन्वानाः विभावादिपदवाच्यत्वेन व्यवहरन्ति । प्रश्न उदेति सामाजिकैः रसः कथम् आस्वाद्यते? उच्यते यद्यपि अनुमीयमानः रसः न नटादौ न सामाजिकादौ किन्तु वासनाबलकवलिताः सामाजिकाः रसमनुमिन्वन्ति । काव्यप्रकाशकाराः—"...सामाजिकानां वासनया चर्व्यमाणो रसः इति श्रीशङ्ककः" ।

श्रीशङ्ककमतखण्डनम्

रसानुभूतिः अनुमानेनैव प्रमाणेन जायते इत्यतः अनुमानाज्जायमानं ज्ञानं परोक्षं न तु प्रत्यक्षम् । वस्तुतस्तु अनुमानप्रमाणात् जायमानानन्दानुभूत्यपेक्षया प्रत्यक्षज्ञानाज्जायमानानन्दानुभूतिरुत्कृष्टतरा । किञ्च प्रकृतानुमानस्य कृत्रिमाश्रितत्वात्, कृत्रिमसाधनात् अनुमितिरसम्भवा । किञ्च नाट्यशास्त्रे अनुकरणसिद्धान्तस्य संकेताभावात् नाट्याशास्त्रकारविरुद्धमपि मतमिदम् ।

भट्टनायकमतम्

सांख्यशास्त्रसम्मतो हि भट्टनायकस्य भुक्तिवादसिद्धान्तः । एतन्मते "विभावानुभावव्यभिचारिसंयागात् रसनिष्पत्तिः" इति भरतोक्तरससूत्रस्थस्य संयोगपदस्य भोज्य-भोजकभावसम्बन्धः अर्थः, निष्पत्तिपदस्य च भुक्तिरित्यर्थः । तथाहि रसः न उत्पद्यते न प्रतीयते नापि अभिव्यज्यते अपि तु साधारणीकरणरूप-भावकत्वव्यापारेण भाव्यमानः सत्त्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तित्वेन भुज्यते ।

रसस्य प्रतीतिः न ताटस्थ्यस्य रामादेः । नापि आत्मगतत्वेन तत्प्रतीतिः । तदानीं रङ्गमञ्चे रामादीनाम् अभावेन तद्रत्यादेरपि अभावात् । सत्त्वेन असतः अनुमानप्रमाणायोगात् । वास्तविकदृष्ट्या रामसीतादेः अन्तःकरणे स्थितानां नटादिना अनुमितानां रत्यादिभावानां तत्कालीने सामाजिकान्तःकरणे अविद्यमानत्वात् तेषां हृन्मानसे रसविषकचमत्कारमुत्पादयितुं अशक्यत्वात् । तथा च विभावादीनामकृत्रिमत्वात् नटेषु रसोत्पत्तिः वक्तुम् अशक्या । न रसस्य व्यञ्जनाव्यापारगम्यत्वम् । पूर्वविद्यमानस्यैव पदार्थस्य

व्यञ्जनया प्रकाशयितुं शक्यत्वात्। यथा दीपः विद्यमानं घटमेव प्रकाशयति, नाविद्यमानम्। एवं काव्ये नाट्ये च अभिधातः द्वितीयेन भावकत्वव्यापारेण साधारणीकरणात्मना सम्बन्धविशेषपरित्यागेन रामत्वसीतात्वादिविशेषबुद्धिपरित्यागेन सा रतिः स्थायिभावः भोजकत्वव्यापारेण भुज्यते। सहृदयमनसि सत्त्वगुणस्तदा रजस्तमसी अभिभूय प्रकाशते। प्रकाशशरीरादभिन्नत्वेन आनन्दचिन्मयत्वेन रसः अनुभूयते। तज्ज्ञाने ज्ञेयान्तरःपदार्थः न तिष्ठति।

झल्कीकारस्तु— "शब्दस्याभिधाव्यापारवत् काव्यनाट्ययोस्तद्विलक्षणं भावकत्वभोजकत्वनामकं व्यापारद्वयमतिरिक्तमस्ति, काव्यार्थबोधोत्तरमेव तत्राद्येन भावकत्वव्यापारेण विभावादिरूपसीतादयो सम्बन्धिनी रतिश्च सीतात्वरामत्वसंबन्धांशमपहाय सामान्यतः कामिनीत्व-रतित्वादिनैवोपस्थाप्यते, अन्त्येन भोजकत्वव्यापारेण तु उक्तरीत्या साधारणी-कृतविभाविसहकृतेन सा रतिः सहृदयैरास्वाद्यते" इति।

भट्टनायकमतखण्डनम्

भट्टनायकसम्मतव्यापारद्वयकल्पने प्रमाणाभावः। किञ्च व्यञ्जनायाः यत्रावसरः तत्र व्यापारान्तरकल्पनायां गौरव एव। तस्मात् नायं पक्षः समीचीनः।

अभिनवगुप्तपादमतम्

अभिनवश्चासौ गुप्तपादः अभिनवगुप्तपादोऽयं शेषावतार इति विवदन्ते विद्वांसः। नाट्यशास्त्रे कृतभूरिपरिश्रमः तच्छास्त्रे "अभिनवभारती"ति नाम्नीं टीकामपि व्यरचयत्। तत्र विद्यमानस्य "विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिः" इति रससूत्रस्थस्य संयोगपदस्य व्यङ्ग्य-व्यञ्जकभावसम्बन्धः, निष्पत्तिपदस्य च अभिव्यक्तिरित्यर्थः। तस्मात् वादोऽयम् अभिव्यक्तिवादः।

अभ्यासपाटवतां सामाजिकानां काव्यनाट्यभिन्नस्थले नायक-नायिकाद्यालम्बनकारणैः उद्यानोपवनाद्युद्दीपनकारणैः कटाक्षादिकार्यैः निर्वेदादिसहकारिकारणैः रत्यादेः अनुमाने कारणकार्यसहकारिकारणत्वादि-व्यपदेशपरित्यागेन विभावनानुभावनव्यभिचारणरूप-व्यापारवत्त्वात् अलौकिकविभावानुभावव्यभिचारिशब्दैः व्यपदिश्यते। लोके शोककारणेभ्यः लौकिकशोकादयः, हर्षकारणेभ्यः लौकिकहर्षादयश्च जायन्ते। परन्तु

काव्ये सर्वेभ्योऽपि कारणेभ्यः सुखमेवोपजायते इत्यलौकिकत्वम् । तदा 'ममैवैते शत्रोरेवैते तटस्थस्यैवैते' इति, 'न ममैवैते न शत्रोरेवैते न तटस्थस्यैवैते' इति च स्वीकारपरिहारनियमयोः अनिर्णयात् साधारण्येन सीतात्वादिविशिष्टांशपरित्यागेन अयं रामः सीताविषयकरतिमान् इयं सीता रामविषयकरतिमती इत्याद्यंशपरित्यागेन कामकामिनीत्वादिना प्रतीतैः वासनारूपेण सूक्ष्मतया स्थितः रत्यादिः स्थायिभावः नियततया सामाजिकगतोऽपि रसास्वादकाले व्यक्तिविशेषसम्बन्धत्वेन अननुभूयमानः वेद्यान्तसम्पर्कशून्यः स्वाकारवदभिन्नत्वेन प्रपाणकरसन्यायेन चर्व्यमाणः विभावादिकालावधिः अलौकिकचमत्कारकारी रसः आस्वाद्यते ।

रसस्य न कार्यत्वं, विभावादीनां नाशेऽपि तस्य स्थितिप्रसङ्गात् । रसः यदि कार्यः स्यात्तदा दण्डादिकारणनाशे सति यथा घटस्य प्रतीतिः तथा रसप्रतीतिप्रसङ्गः । रसः ज्ञाप्यः इत्यपि वक्तुं न शक्यते । ज्ञाप्यस्य हि ज्ञापकपूर्वकालवृत्तित्वं लोके प्रसिद्धम् । प्रदीपः अन्धकारावच्छिन्ने गृहे पूर्वविद्यमानमेव घटं प्रकाशयति न पुनरविद्यमानम् । न रसः तथा । रसस्तु विभावादिभिः व्यञ्जितः पुनःपुनश्चास्वादनीयः ।

कारकज्ञापकाभ्यामन्यद् व्यञ्जकत्वं हेतुः न क्वचिदपि दृष्टं तस्मादेव व्यञ्जकत्वहेतोः अलौकिकत्वसिद्धिः । पुनश्च रसस्य निष्पत्तिरिति यदुक्तं तदपि चर्वणोत्पत्तिमादायैव । एतेन औपचारिकतया रसस्य कार्यत्वमपि सिध्यति । किञ्च लौकिकं प्रत्यक्षादिप्रमाणानपेक्ष्यज्ञानम्, अपक्वयोगिनां ध्यानजन्यं ज्ञानम्, वेद्यान्तरसम्पर्कशून्यं परमात्मविषयकं ज्ञानम् एतत्त्रितयात् विलक्षणं लोकातीतं स्वात्मकं संवेदनं, तद्विषयः रसः । अतः ज्ञाप्यत्वमपि स्वयंप्रकाशत्वेन सिध्यति ।

ज्ञानापरपर्यायो हि संवेदनम्, तद् द्विविधं निर्विकल्पकं सविकल्पकं च । रसज्ञानं न निर्विकल्पकम् । निर्विकल्पकं नामरूपजात्यादिविशेषशून्यं ज्ञानम् । तद्विपरीतं च सविकल्पकम् । रसग्राहकं न निर्विकल्पकं विभावादीनां सम्बन्धज्ञानस्य प्रयोजनीयत्वात् । न सविकल्पकमपि, आस्वाद्यमानस्य रसस्य स्वात्मकप्रतीतिमात्रेणैव सिद्धत्वात् । सविकल्पकज्ञाने तु नामरूपादीनां प्रतीतिर्जायते । अस्मिन् रसानुभवे जाते विभावादयः नैव प्रतीयन्ते ।

किञ्च "विरुद्धयोरेकतरनिषेधे अपरस्मिन् पर्यवसानम्" इति न्यायेन सविकल्पकनिषेधे निर्विकल्पकत्वम्, निर्विकल्पकनिषेधे

च सविकल्पकत्वमिति उभयाभावरूपस्य उभयात्मकत्वं सिध्यतीति अभिनवगुप्ताचार्याणां मतम् ।

शोधसमाधानम्

(क) पूर्ववादत्रयस्य न खण्डनमात्रम्, अपितु विकासः

आचार्यः अभिनवगुप्तपादः पूर्वतनं वादत्रयं न केवलं निरस्यति, अपितु तेषां चिन्तनस्य परिष्कृतं रूपं स्वात्मसात् करोति । लोल्लटात् रसस्य लौकिकमूलाधारः गृहीतः । शङ्कुकात् अनुमानात्मकः पक्षः स्वीकृतः ।भट्टनायकात् 'साधारणीकरणम्' तथा 'काव्यस्य भोग्यत्वम्' गृहीतम् ।

(ख) 'संयोग' तथा 'निष्पत्ति' इत्यनयोः सर्वमान्योऽर्थः

• संयोगोऽत्र व्यङ्ग्य-व्यञ्जक-भावात्मकः, अभिव्यञ्जकः विभावः, अभिव्यङ्ग्यश्च स्थायी भावः ।

• निष्पत्तिरित्यस्य अभिव्यक्तिरित्यर्थः, न तु नवीना उत्पत्तिः, न च केवलं काल्पनिकं ज्ञानम् ।

(ग) साधारणीकरणेन रसानन्दस्य अलौकिकत्वम्

समाधानस्य मुख्यबिन्दुः अस्ति यत् रसः न तु अनुकार्ये तिष्ठति न वा केवलम् अभिनेतरि, अपितु सत्त्वोद्रेकात् साधारणीकृते सहृदयस्य अन्तश्चित्ते अभिव्यक्तिं प्राप्नोति । अयं रसः 'ब्रह्मानन्दसहोदरः' अलौकिकश्च वर्तते ।

उपसंहारः

एवं संक्षेपेण वादचतुष्टयं निरूपितम् । यत्र उत्पत्तिवादः शङ्कुकेन, शङ्कुकमतं भट्टनायकेन, भट्टनायकमतं च अभिनवगुप्तपादेन खण्डितम् । तेषु वादेषु अभिनवगुप्तमतमेव सर्वमतसम्मतम् । मम्मटाचार्य-विश्वनाथ-जगन्नाथादयो शास्त्रकाराः तन्मतमेव स्वशास्त्रेषु सिद्धान्तत्वेन स्वीचक्रुः । मयापि तन्मतमेव अनुसृत्य प्रकृतशोधप्रबन्धः समापितः इति शम् ।

* * *

Bibliography

1. *नाट्यशास्त्रम्* (अभिनवगुप्तप्रणीताभिनवभारतीसहितम्) ; भरतमुनिः ; मधुसूदनशास्त्री (सम्पादकः) ; काशीहिन्दूविश्वविद्यालयः ; वाराणसी ; २०२८ (वि० सं०) ।
2. *काव्यप्रकाशः* (बालबोधिन्याख्यटीकया समन्वितः) ; मम्मटभट्टः ; दशरथात्मजः नारायणः (संशोधकः) ; परिमल पब्लिकेशन्स ; दिल्ली ; २०२२ ।
3. *रसगङ्गाधरः* (चन्द्रिका-संस्कृत-हिन्दीव्याख्योपेतः) ; पण्डितराजजगन्नाथः ; श्रीबदरीनाथझा (संस्कृतव्यख्याकारः) ; श्रीमदनमोहनझा (हिन्दीव्याख्याकारः) ; चौखम्बा विद्याभवन ; वाराणसी ; २०२१ ।
4. *काव्यप्रकाशः* (नागेशभट्टविरचितोद्योतयुतगोविन्दठक्कुरविरचितप्रदीपसमेतः) ; मम्मटभट्टः ; आचार्यश्रीशिवजी-उपाध्यायः (सम्पादकः) ; सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः ; वाराणसी ; २००२ ।
5. *काव्यप्रकाशः* (सरलाख्यया हिन्दीव्याख्यया समलङ्कृतः) ; मम्मटभट्टः ; पं. रघुनाथप्रसाद चतुर्वेदी ; चौखम्भा संस्कृत संस्थान ; वाराणसी ; २००३ ।
6. *साहित्यदर्पणः* (सटिप्पण'लक्ष्मी'व्याख्याविभूषितः) ; विश्वनाथः ; आचार्यः कृष्णमोहनशास्त्री (व्याख्याकारः) ; चौखम्भा संस्कृत संस्थान ; वाराणसी ; २०६८ (वि.सं.) ।

* * *